6.3.7

सरलमानकसंस्कृतं प्रशासनप्रबन्धनयोः माध्यमरूपेण प्रतिष्ठापयितुम् अनिवार्यतया प्रशिक्षणादिद्वारा सर्वेषां कर्मकराणां सामर्थ्यं निर्मातुं स्वीकृताः व्यूहाः ।

Answer:

प्रशासनप्रबन्धनयोः माध्यमरूपेण सरलमानकसंस्कृतस्य प्रतिष्ठापनाय विश्वविद्यालयेन कोरोना कालखण्डोत्तरं विविधाः नवव्यूहाः संरचिताः सन्ति। यद्यपि विश्वविद्यालये संस्कृतज्ञाःध्शास्त्रज्ञाः एव अधिकाः प्रशासकाः प्रबन्धकाः च सन्ति तथापि अन्येषाम् अपि कार्यालयीयकर्मचारिणां कृते सरलमानकसंस्कृतमुखेन प्रशिक्षणप्रदानाय विश्वविद्यालयेन विविधाः व्यूहाः रचिताः सन्ति। ते च क्रमशः यथा –

**१. कार्यालये संस्कृतम्**

कार्यालयः प्रशासनप्रबन्धनयोः कृते गतिशीलतां यच्छति। कार्यालयः यदि पूर्णशः संस्कृतमयः भवति तर्हि प्रशासनप्रबन्धनयोः संस्कृतपरकार्याणां गतिशीलता समभिवर्धतेतमाम् । अतः एव मुख्यालयेन कार्यालये संस्कृतम् इति नव्यः व्यूहः विरचितः वर्तते। सर्वान् कार्यालयीयान् सरलमानकसंस्कृतमुखेन प्रशिक्षयितुमेव अयं व्यूहः कुलपतिभिः परिकल्पितः वर्तते। कार्यालयेभ्यः सूचनापत्राणि आदेशपत्राणि विज्ञापनानि यानि निर्गच्छन्ति तानि संस्कृतेन प्रकाश्यन्ते चेत्तर्हि धनात्मकः परिणामः आयाति। विविधानां विभागीयानां सूचनापत्राणि संस्कृतेन एव संलग्नानि भवन्ति। तदुपरि हिन्द्यां कुत्रचित् आङ्ग्ले प्रादेशिकभाषायां च सूचनापत्राणि आरोप्य प्रसारयन्ति कार्यालयीयाः । व्याकरणविभागीया गोष्ठी प्रचलति चेत्तर्हि गोष्ठीसम्बद्धं विज्ञापनादिकं विवरणादिकं च सरलमानकसंस्कृतेन एव भवन्ति। तदुपरि कार्यालयादेशपत्रं संयोजयन्ति। इतः परं सर्वविधानि सूचनापत्राणि सरलमानकसंस्कृतेन अपि प्रकाशयितुं यत्नः आरब्धः वर्तते।

**२. विश्वविद्यालयस्य जालस्थानेषु सरलमानकसंस्कृतम्**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य जालस्थाने सम्पूर्णस्य विश्वविद्यालयस्य विभागादीनां समितीनां सौकर्याणां च विवरणं हिन्दी भाषायाम् आसीदेव। सरलमानकसंस्कृतेन अपि जालस्थाने विश्वविद्यालयस्य लघुपरिचयरूपाणि विवरणानि संयोजितानि सन्ति। विश्वविद्यालयस्य प्रतिष्ठापनं कदा अभवत्? कति विभागाः सन्ति? कार्यक्षेत्राणि कानि ? विश्वविद्यालयस्य दूरदृष्टिः कीदृशी? ध्येयानि कानि ? इत्यादीनि तत्र सरलमानकसंस्कृतेन उल्लिखितानि सन्ति। अतः बालाः अत्रत्यं प्रशासनप्रबन्धनयोः लिपिबद्धं परिचयं सरलमानकसंस्कृतमुखेन प्राप्तुं प्रभवन्ति।

**३.प्रशासनप्रबन्धनप्रकोष्ठेषु सरलमानकसंस्कृतम्**

विश्वविद्यालयस्य परिसरे तत्रत्येषु प्रशासनप्रबन्धनप्रकोष्ठेषु इतरत्र च भित्तिषु सरलसुभाषितवाक्यानि नीतिवाक्यानि मूल्ययुक्ताः मन्त्राः उल्लिखिताः सन्ति। वेदोऽखिलो धर्ममूलम् ,

सत्यं वद धर्मं चर , स्वाध्यायान्मा प्रमदः , विद्याधनं सर्वधनप्रधानम्, विद्यया विन्दतेऽमृतम् इत्यादीनि सरलवाक्यानि मन्त्राश्च कार्यपथे वर्तमानान् प्रशासकान् प्रबन्धकान् अनुदिनं प्रेरयन्ति। विश्वविद्यालय प्रवेशदारभ्य मार्गे सर्वत्र सुभाषित फलकानि संस्कृते हिन्द्यां च विद्यन्ते।

**४.संस्कृतसम्भाषणशिबिरैः सरलमानकसंस्कृतम्**

प्रशासकाः कार्यालयीयकर्मचारिणां कृते सरलमानकसंस्कृतमुखेन प्रशिक्षणप्रदानाय संस्कृतसम्भाषणशिबिराणि काले काले आयोजयन्ति। एतेषां शिबिराणां साहाय्येन कार्यालयीयकर्मचारिणः सरलसंस्कृतेन व्यवहर्तुम् अपेक्षितं सामर्थ्यं विन्दन्ति। केचन प्रबन्धकाः कार्यालयीयकर्मचारिणः च यथा शिक्षकाः सरलमानकसंस्कृतमुखेन भाषणं कुर्वन्ति तथा एते अपि कर्तुं शक्नुवन्ति। ग्रन्थालये, दिनेशतिवारी गणकयन्त्रविभागे, विश्वात्मा दुबे शारीरिकशिक्षाविभागे , आदित्य कुमार, समाजकल्यराण विभागे– नित्यानन्दमिश्रः, सामाजिक विज्ञान विभागे– मनोज द्विवेदी, शैक्षिक विभागे – संजय तिवारी, अधीक्षक प्रशासन – सुनील चौधरी, परीक्षा विभागे – उमेशमणिः, लेखाविभागे कौशलनाथ झा, रूसा विभाग – देवी प्रसाद खरवार, सामान्य विभागे सुधांशुधर द्विवेदी, यू.जी.सी.विभागे मिथिलेश यादव अन्येषु विभागेषु च कार्यरताः अधिकाधिकाः कर्मचारिणः सरलमानकसंस्कृतेन भाषितुं समर्थाः सन्ति। वाटिकासु , वराण्डेषु , प्रवेशद्वारेषु , निर्गमद्वारेषु अपि संस्कृतभाषाभाषिणः विश्वविद्यालये नयनपथमवतरन्ति। आधुनिकविषयेषु सन्तोपि सामाजिक विज्ञान विभागे प्रो0 शैलेश मिश्र, शिक्षाशास्त्रविभागे – विशाखा शुक्ला, गृहविज्ञान विधु द्विवेदी च संस्कृते भाषणं कर्तुं समर्धाः।

एतादृशैः विविधैः उपायैः व्यूहैश्च प्रशासनव्यवस्था पूर्णशः संस्कृतपरा वर्तते इति फलितम्।